Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११४८ - घ

Title पद्मपुराणे तुलसी स्तोत्रम्

Author

Extent ५ Age

Subject पुराणम् - सम्पूर्णम्

५ ७३

नं० ११४८ — घ

पद्मपुराणे तुलसीस्तोत्रम् (पुराणम्)

पत्राणि ५ (सम्पूर्णम्)

नं० ११४८ — घ



तु.
२

ॐ श्रीगणेशाय नमः ॥ द्विजा ऊचुः ॥ तुलसीपुष्प-
माहात्म्यंश्रुतंत्वत्तोहरेःशुभं ॥ तस्याःस्तोत्रंश्रुतंपुण्य-
श्रोतुमिच्छामिहेवद ॥ १ ॥ व्यासउवाच ॥ पुरास्कंदपु-
राणेचयन्मयाकीर्तितंद्विजाः ॥ कथयामिपुराणा
चपुरतेनामोत्तहेतवे ॥ २ ॥ शतानंदमुनेःशिष्याःसर्वे
तेषांसततव्रताः ॥ प्रणिपत्यगुरुंविप्राःपप्रच्छुःपुण्य
तोहितं ॥ ३ ॥ पूर्वंब्रह्ममुखोत्पन्नाष्टयच्छ्रुतंतुलसीस्त
वं ॥ तदद्यश्रोतुमिच्छामस्त्वत्तोब्रह्मविदांवर ॥ ४ ॥ श
तानंदउवाच ॥ नामोच्चारेकृतेनस्याःप्रीणात्यसुरद

राम
२

श्री

पैहा ॥ पापौं विलयं यांति तुलसं भवति चाक्षयं ॥५॥
मा कथं तुलसी लोकैः पूज्यते वंद्यते नहि ॥ दर्शना
देव यस्यास्तु दानं कोटिगुणं भवेत् ॥६॥ ध्यानात्स्ने-
मान्नवालोके यज्रहे विद्यते कलौ ॥ शालग्रामशि
लातीर्थं तुलसीप्रत्यहं लिनो ॥७॥ तुलसी ये वि-
चिन्वंति धन्यास्ते करपल्लवाः ॥ केशवार्थं कलौ
ये च रोपयंतीह भूतले ॥८॥ किं करिष्यति संरुष्टो-
यमोपि सह किंकरैः ॥ तुलसीदलेन देवेशः पूजि-
तो येन दुःखहा ॥९॥ तीर्थयात्रादिगमनैः फलसि

त॰
२

धात्रिकिन्नरः ॥ १० ॥ स्नानेदानेतथाध्याने प्राशनेकेश
वार्चने ॥ तुलसीदहते पापंकीर्तनेरोपणेकलौ ॥ ११ ॥
तुलस्यमृतजन्मासि सदात्वंकेशवप्रिये ॥ केशवा
र्थंचिनोमित्वांवरदाभवशोभने ॥ १२ ॥ त्वदंगसंभवै
र्नित्यंपूजयामियथाहरिं ॥ तथाकुरुपवित्रांगीकं
लौमलविनाशिनी ॥ १३ ॥ मंत्रेणानेनयःकुर्याद्विचि
त्यतुलसीदलं ॥ पूजनंवासुदेवस्यलक्षकोटिगुणं
भवेत् ॥ १४ ॥ प्रभावंतवदेवेशिगायंतिसुरसत्तमाः ॥ मु
नयःसिद्धगंधर्वाःपातालेनागराट्स्वयं ॥ १५ ॥ नते ॥

३

प्रभावं जानंति देवताः केशवादृते ॥ गुणानां परिमा
णं न कल्पकोटिशतैरपि ॥१६॥ कृष्णानंदात्समुद्भू
ता क्षीरोदमथनोद्यमे ॥ उत्तमांगे पुरा येन तुलसी वि
धृता ॥१७॥ प्राप्यैतानि त्वया देवि विष्णोरंगानि
सर्वशः ॥ पवित्रता त्वया प्राप्ता तुलसीं त्वां नमाम्यहं ॥१८॥
त्वदंगसंभवैः पुत्रैः पूजयामि यथा हरिम् ॥ तथा कु
रुष्व मे विघ्नं यतो यामि परां गतिं ॥ रोपिता गोमतीती
रे स्वयं कृष्णेन पालिता ॥ जगद्धिताय तुलसी गोपीनां
हितहेतवे ॥१९॥ वृंदावने विचरता सेविता विष्णुनास्व

तु॰
३
७

यं ॥ गोकुलस्यापि वृन्दाय्यै केसरस्यानिधनायच ॥ १९ ॥ व
सिष्ठवचनात्पूर्वं रामेणापहृथमानते ॥ रासस्थानांवथा
ध्यायरोपितातेजगतिप्रिये ॥ २० ॥ सोपिनानपमोहृष्टेतु
लसीत्वांनमाम्यहं ॥ विद्यागोवासुदेवस्यक्रीडायात्वां
जनकात्मजा ॥ २१ ॥ अशोकवनमध्येतुप्रियेणासहसं
गता ॥ सोपिनानपमोहृष्टेतुलसीत्वांनमाम्यहं ॥ २२ ॥
सर्वाभिर्देवपत्नीभिः किन्नरैश्चापिनंदने ॥ २३ ॥ स्वमना
पानाथायसेवितात्वांनमोस्तुते ॥ धर्मारण्येगयायां
चसेवितापितृभिः स्वयं ॥ सेवितातुलसीपुण्यात्मा॰ ३

स्मनोहितमिच्छता ॥ १९ ॥ सीतया लक्ष्मणेनापि रामः
चंद्रेण सेविता ॥ गोपिनापालिता भक्त्या तुलसी दंडके
वने ॥ २० ॥ त्रैलोक्यव्यापिनी गंगा यथा शास्त्रेषु गीय
ते ॥ तथैव तुलसीदेवी दृश्यते सचराचरे ॥ २१ ॥ ऋक्ष्य
मूके च वसता कपिराजेन सेविता ॥ तुलसी वालिना
शायता रासंगमहेतवे ॥ २२ ॥ प्रणम्य तुलसी देवी सा
गरोत्क्रमणं कृत ॥ कृतकार्यः प्रहृष्टश्च हनूमान्पुन न
रागतः ॥ २३ ॥ तुलसीग्रहणं कृत्वा विमुक्तो याति पा
तकैः ॥ अथवा मुनिशार्दूल ब्रह्महत्याव्यपोहति ९

तु॰
५

तुलसीपत्रगलितंयस्तोयंशिरसावहेत॥ गंगास्नानम
वाप्नोतिदशधेनुफलप्रदं॥२१॥ प्रसीददेवदेवेशिप्रसीद
हरिवल्लभे॥ क्षीरोदमथनोद्भूते तुलसी त्वांनमाम्यहं ॥२२॥
द्वादश्यांजागरेरात्रौयःपठेत्तुलसीस्तवं॥ द्वात्रिंशदपरा
धांश्चक्षमतेतस्यकेशवः॥२४॥ यत्पापंयौवनेबालेकौ
मारेवार्द्धकेकृतं॥ तत्सर्वंविलयंयातितुलसीस्तवपाठतः॥२५॥
प्रीतिमायातिदेवेशाक्तश्चोलक्ष्मीप्रयच्छति॥ उक्तेनपात्र
नाशंचसर्वंविघ्नंप्रयच्छति॥२६॥ तुलसीनाममात्रेण
देवायच्छतिवांछते॥ गस्त्रानामपिदेवेशोमुक्तिंयच्छति ५

देहिनां ॥ ३७ ॥ तुलसीस्तवसंतुष्टा सर्वं वृद्धिं ददाति च ॥
उद्धृतं हेलया विद्धि पापं यमयच्छेस्थितं ॥ ३८ ॥ यस्मिन्गृ
विद्यते ३ हे च लिखितं विन्यस्तं तुलसीस्तवः ॥ नाशुभं विद्यते तस्य शुभमा
माप्नोति निश्चितं ॥ ३९ ॥ सर्वं च मंगलं तस्य नास्ति किंचि
दमंगलं ॥ सुभिक्षं सर्वदा तस्य धनं धान्यं च पुष्कलं ॥ ४० ॥
निश्चला केशवे भक्तिर्न वियोगश्च वैष्णवैः ॥ जीवति व्या
धिनिर्मुक्तो नाधर्मे जायते मतिः ॥ ४१ ॥ द्वादश्यां जागरे रा
त्रौ यः पठेत्तुलसीस्तवं ॥ तीर्थकोटिसहस्रैस्तु यत्फलं ल
ब्धकोटिभिः ॥ तत्फलं समवाप्नोति पठित्वा तुलसीस्तवं ४२

तु॰ ५

5

इति श्रीपद्मपुराणोत्तरखंडे तुलसीस्तवमाहात्म्ये एकपं-
चमोध्यायः ॥ राम ॥ राम ॥

राम ५